७

अत्र एकः बालकः एका बालिका च तिष्ठतः। सा बालिका तस्य बालकस्य स्वसा। तौ किं कुरुतः? तौ सँल्लपतः।

स बालकः ह्यः पाठं न अपठत्। उपाध्यायः तम् अताडयत्।

तां वार्तां तस्य स्वसा पित्रे अकथयत्। पिता पुत्रम् अभर्त्सयत्।

तेन कुपितः स बालकः स्वसारम् अनिन्दत्।

सा भ्रातरं तर्जन्या तर्जयति।

राम! अपि त्वम् अद्य प्रातः स्वसुः गृहम् अगच्छः? आर्य! अहं न अगच्छम्। श्वः परश्वो वा गमिष्यामि। ह्यः सायं त्वं किम् अकरोः? ह्यः सायम् अहं पित्रा सह विपणिम् अगच्छम्।